
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

पं. द. ११

१३०

नञ्वादविवेचन

Accession No:- ~~325~~ M889

Title:- नञ्वादविवेचन

Author:- रुद्रदेव

Subject/विषय:- न्याय

पत्र - 30

(1)

प्रती ४

श्रीरघुनाथाय नमः ॥ शिवं प्रणम्य तत्सम्भ्रान्त वागीश्वरं गुरुं ॥ श्रीपते रघुदेवेन अभावादवि
वेचनं ॥१॥ प्रसंगसंगत्या नञः शक्यतावच्छेदकं व्यवस्थापयति ॥ संसर्गाभावश्चेत्यादि ॥
संसर्गाभावत्वं अन्योन्याभावत्वं च नैकरूपं ॥ नञः शक्यतावच्छेदकमित्यर्थः ॥ संसर्गा
भावत्वं च ध्वंसप्रागभावादौ संसर्गाभाव इतीति सामान्यको अतिरिक्तो अखण्डोपाधिः ॥
केचित्तु ॥ संसर्गाभावत्वं संसर्गारोपजन्यप्रतीतिविषयाभावत्वं । न चाभावबुद्धौ प्रति
योगिसंसर्गारोपस्य हेतुत्वे मानाभावान्नेवमिति वाच्यं ॥ तथाविधकार्यकारणभावा
कल्पनेन प्रतियोगिज्ञानकाले सर्वत्रैकदा नानासंबंधावच्छिन्नप्रतियोगिताकनानाभा
वलौकिकप्रत्यक्षत्वापत्तेः ॥ तत्तत्संबंधावच्छिन्नतत्तत्प्रतियोगितावच्छेदकावच्छिन्नप्रत्ययं त
संबंधावच्छिन्नसंसर्गज्ञानस्य हेतुत्वे तु तत्प्रतियोगिज्ञानकाले सर्वत्र एकदा नाना

प्रतियोगिताकाभावलौकिकप्रत्यक्षत्वावच्छिन्नं प्रति तत्तत्प्रतियोगितावच्छेदकावच्छिन्नीयर

ग१

भावलौकिकप्रत्यक्षापत्त्यसंभवइतितथाविधकार्यकारणभावकल्पनाया आवश्यकत्वात्॥ नचैवंसति अभावलौकिकप्रत्यक्षंप्रतियोगितावच्छेदकप्रकारकज्ञानस्यहेतुताविलोपप्रसंगप्रतियोगितावच्छेदकप्रकारकज्ञानशून्यकालेतथाविधसंसर्गज्ञानाभावेनैवाभावलौकिकप्रत्यक्षापत्तिवारणासंभवात्॥ संसर्गज्ञानजनकतावच्छेदकतावच्छेदककोटौ प्रतियोगितावच्छेदकप्रकारकत्वनिवेशप्रयोजनाभावेनद्रव्यत्वप्रकारकघटत्वावच्छिन्नीयसंसर्गज्ञानकाले घटत्वप्रकारकज्ञानाभावदशायां घटत्वावच्छिन्नप्रतियोगिताकाभावलौकिकप्रत्यक्षापत्तेर्दुर्वारत्वेन तादृशकार्यकारणभावकल्पनायाः आवश्यकत्वादितिवदंति॥ तन्न॥ अतींद्रियसंसर्गाभावे तादृशधर्माभावेनतत्संसर्गस्य तावच्छेदकस्यतत्साधारण्यानुपपत्तेः॥ एवमन्योन्याभावत्वमप्यखंडोपाधिः॥ ननुता

४ इतिवाच्यं

दात्म्यसंबंधावच्छिन्नप्रतियोगिताकाभाववत्वं खंडो तु संयोगितादा
त्म्यैः संयोगरूपतायाः संयोगावच्छिन्नप्रतियोगिताकाभावात् इति व्याप्तेर्दुष्परिहरत्वादिति॥ व
स्तुतस्तु अन्योन्याभावस्य प्रतियोगितावच्छेदकत्वे संबंधे मानाभावे न तादात्म्यस्य तत्प्रतियो
गितावच्छेदसंबंधत्वाभावात् तादृशलक्षणमसंभवदुक्तिकमेव तत्वाभावमात्रस्यैव
प्रतियोगितावच्छेदके संबंधसद्भावे प्रमाप्रयोगसाधुत्वार्थे नामर्थयोरभेदेनान्वयबोध
एवंप्रकारित्वं तविलक्षणत्वर्थोपस्थिते स्तुल्यत्वात्। लाघवेन तयोरन्वयबोधमात्र एवत
थात्वं विशेषणविभक्तेः स्वभ्ये। दार्थिकानीलोत्पलं चित्रगुरित्यादौ तु प्रापाविभक्तेरर
नुपसंधानमिति मते तु नराऽऽ इत्यत्र षष्ठ्यर्थस्य संबंधस्यैवात्रापि समप्त्यर्थस्याभे
दस्याभावो बोध्यतां॥ यत्तु उक्तरणनिषेधे विकल्पापत्तेरभेदपरतेति।\ तदसत्॥

विशेषणंनिषेधेसामान्यविधेस्तदितरपरतायाः ब्राह्मणेभ्योदातव्यंनकौडिन्यायनदा
तव्यमित्यादौ व्युत्पत्तिसिद्धत्वेनविकल्पानवकाशात्॥ नचतत्रापिकौंडन्यदेशो
बोध्यः॥ कौंडिण्यपदस्यविरुद्धवुद्धत्वानुपस्थितत्वात्॥ नखलुमहतोराज्ञो मैनमहतोराज्ञ
इत्यत्रैवमहतोराज्ञोनमहतोराज्ञइत्यत्रापिराजनिमहदभेदस्येदप्रतिपे
तेरेकोननद्वाविंतिवल्केयंचित्तत्समर्पनेपिद्वितीयस्यदातव्यमित्यस्यानन्व
यप्रसंगात्॥ अतएवरात्रौश्राधंकुर्वीतेत्यादौकरणनिषेधेपिनविकल्पावकाशः
नहितत्रापिरात्रीतरपरतारात्रौकिन्तुश्राद्धविधावपिअमावास्यायांपितृभ्योद
द्यादित्यादितोरात्रौश्राद्धप्रसक्तिर्दुर्वारित्वात्॥ नखलुक्रियारहितमपिपितृभ्योश्राद्ध
विधायकं॥ वाक्यांतरमस्तीयेनेदंतेनसमर्थ्ये कवाक्यतामासादयेत्॥

चना

२॥

पा

२॥

नापि हैरंनानुपपन्नरूपाजेष्टिः क्रियारहितं अथ रात्रौ श्राद्धस्य प्रसक्तौ विकल्पापत्तिर
प्रसक्तनिषेधानुपपत्तिः प्रसक्तं हि प्रतिषिध्यत इति विसाधिना यं मंत्र पाठः येद्धुल्ला
ज्वाल हृदेव वह्निर्नास्ति स्यादो शाद बोधे पि॥ परम प्रयत्नेन तत्र वह्निप्रसक्तिरूपा
दीप्यते वह्निनिषेधक विधिवैयर्थ्यमिति चेत् तास्य योनिवह्नो च निबंधन रात्री
श्राद्धकरण वारणस्य तदर्थत्वात्॥ एकविषयतया पुनरन्येनैगतिकतया षोड
शिग्रहणाविकल्प इति॥ अत्र च षोडशिग्रहणं नेष्टसाधनं इत्यादिकं नार्थः
वि॰ ग्रहणविधिविरोधात्॥ अपितु षोडशिग्रहणाभाव इष्टसाधनमित्यादिकं॥
युस्पन्त श्वन न्नु समभिव्याहृतस्य यात्तर्थस्याभावेपि विभक्त्यर्थान्वयः अत
व॰ एंप्राभाकराणां वेत्त्वं ज्वंक्ष वाये दिति श्रुतिः॥ कलंज भक्षणाभाव विषयकेवा

षा ३

॥३॥

र्यामित्याहुः ॥ नियमस्तु तात्पर्यवशात् सुखफलाजनकत्वेवांगस्य परस्मात्पूर्वत्र
विष्टसाधनत्वमविरुद्धं ग्रहणविध्यन्यथानुपपत्याहु षोडशी ग्रहणादितिवा
विहितं फलं तस्मात्परमापूर्वस्तस्य परमातशापितुं सुखफलमितिकल्प्यतामिति
सर्वं सुस्थं प्रतियोग्यभावयोः प्रतियोग्यनुयोगिभावः अभावाधिकरणयोः
आधाराधेयभावश्च संबंधविधया भासते निपातातिरिक्तस्थल एव
प्रतिपदिकार्थयोरभेदेनान्वये प्रकारीभूतविभक्त्यर्थोपि स्थितस्तं त्रत्वा ॥३॥
त्॥ अतएव इवैवाघटान्वयेनघटः पटेक्षो न घटं स्तूतेल्लं असमोदेशाद्यादौस
मासे सामानाधिकरण्यानुरोधात् न ओऽभाववत्परेता चें के चित्तु प्रतियोगिप
दोत्तरस्य सुपः प्रतियोगित्वं न भाववतिलक्षणा ॥ विभक्त्यर्थानुयोगिसम
स्यनुयोगित्वेवानञुत्तरस्य वाधिकरणत्वे

१४ रन्योन्याभावसंसर्गाविबोधनेनञोऽसनसामर्थ्येनेननपवतिनरमतइत्यादौह्लस

माऽ

नविशिष्टे द्व्यार्थयोरन्योन्याभावोऽस्तू तत्वंनघट इत्यादौ घटादेः संसर्गाभा

प्र२ वो नैतीप्यतइत्याहुः॥ नञ्वादः संपूर्णः॥ ॥ श्रीगणेशायनमः॥ ॥ॐ

संसर्गाभावोन्योन्याभावश्च नञोऽर्थः॥ तत्रचाद्यःपितर वच्छेदकावच्छिन्न

प्रतियोगिताकत्वं सुपत्तिबलात्सिद्धं॥ नीलघटवतीनघटः नीलोघटोना

॥८॥ ट इत्याद्यव्यवहारोत्तु इहपीतघटवत्यांतिननीलोघटःपीतोघटोननील

इत्यादिव्यवहाराश्च प्रतियोग्यभावान्वयोतुल्ययोगक्षेमो॥ तेनयत्सदो

पस्थितस्य प्रतियोगिनोत्तुयोगिन्याधाराधेयभावसंबंधेनैवान्वयस्त

त्रसंसंसर्गाभावस्यापियथातथापिचपचतिचैत्रोनपचतिचैत्रः॥

(7)

॥४॥

चैत्रस्येदं चैत्रस्येत्यादितिङाधर्यस्य स्त्यादेः प्रथमांतोपास्थापित एव तत्र
त्वयेति तदभावस्यापि तथा षष्ठ्या चैत्रादिनी त्तपीत स्वत्वादिक मर्थो
ननु स्वनिष्ठ स्वामित्वादित धनाघटात्वे चैत्री ष्येपि [illegible] नेनेदं चैत्रस्ये
प्रसंगात् ॥ नित्रपकत्वादेः संबंधस्य प्रतियोगित्वानवच्छेदकत्वादित्येषा
दिक् ॥ यत्र चाधारो चेयस्याबोन संबंध मर्यादा लक्ष्य स्तत्रा ॥ नुयोगिपदे
सप्तम्यपेक्षया ॥ यथास्तु तले घटो न घट इति तत्र च तात्पर्यवशात् कदाचि
द्भूतलादेः घटाद्यभावः ॥ क्वाचि [illegible] घटोदो व्वृत्तित्वादि वृत्तित्वाभावो भासते ॥
अत एव पृथिव्यां गंधो न जल इत्यादौ प्रतीते रेकवि [illegible] ष्यकानुभवः ॥

४॥

केचित्तु ॥ सर्वत्र विशेष्यविशेषणस्याभावो नञ्प्रसा अत एव भूतले घटो नास्ति
घटौ न स्तः घटा न संतीत्यादौ घटो नास्तीत्यादाविव नियम इति प्राहुः ॥ तेषाम
तन्न चैक्यतो सत्त्वे सत्र गतिर्भिन्नैव तनीया जातिसमवेतत्वस्याप्रसिद्धत्वात् ॥
संबंधांतरेण जातिवृत्तित्वस्य सत्तायां सत्वात् ॥ सप्तम्यार्थान्विताभाव
स्य विशेषणतया प्रतियोगित्वान्वय इत्यपि केचित् ॥ यत्र च विशेष्यविशे
षणयोः रभेदानान्वयो व्युत्पन्नस्तत्रान्योन्याभावो नञ्बोध्यते यथा
नीलो घटो नायं नीलः पट इति तत्र च विशेष्यविशेषणयोः समान
विभक्तिकत्वं विरुद्धविभक्तिविरहो वा तंत्रं अत एवाह यजतीषु येयजाम
हं करोतीति ॥ ननु याजेऽस्मित्यादावेकवाक्यतानुरोधात् येयजामह इ

५

स्यादेरनुषंगे गौरवाच्च ॥ यजतीघन्नुयाजत्वेदोबोध्य इति ॥ विशेषणनिष्ठत्वमनु
णात्वावइतिवाच्यं ॥ अत्यंताभावस्य प्रतियोगितावच्छेदकसंबंधानंगीकारे बो
धवुद्धिस्थितः प्रतिबध्यबतावच्छेदकनिर्वचनानुपपत्तेः तथाहि घटाभावप्रका
रकज्ञानस्य प्रतिबध्यतावच्छेदकं न घटप्रकारकज्ञानत्वं घटाभावनत्ता
ज्ञानकाले कदाचित्केन संबंधेन घटप्रकारकज्ञानमुत्पद्यते । केनचित्सं
बंधेन तत्नेति नियमोनुपपत्तेः तथाच तादृशनियमानुपरोधेन तेनसंबं
धेनतत्प्रतिकारकज्ञानंप्रतितत्संबंधावच्छिन्नतन्निष्ठाभावप्रतियोगिताक
भावत्वानिर्णयस्य प्रतिसंबंधेकतायाः अवश्ययवक्तव्यत्वादत्यंताभावप्र
तियोगिताकाभावसिद्धिः ॥ नचैवमन्योन्याभावस्यापितात्सिद्धौ प्र

५॥

क्तेः तुल्यत्वेति वाच्यं॥ घटत्वप्रकारकबुद्धिं प्रति घटान्योन्याभावस्यापि वक्तानिर्णयत्वे प्र
तिबंधकत्वकल्पने नैवं सांजस्ये विना अन्योन्याभावप्रतियोगितावच्छेदक
संबंधं प्रतिवध्यप्रतिबंधकाभावानुपपत्तिरूपबाधकाभावे नु युक्तेरतुल्य

र्म

त्वात्॥ न त्वभाववत्स्य न अज्ञास्यतावच्छेदकत्वे गौरवेण लाघवाद् अभावव
त्वरूपकधर्मस्यैव तदवच्छेदकत्वप्रकारकमुचितम् इति संसर्गाभावश्रेत्या
द्विमगंध्यो अत्लमनक इति चेन्न॥ घटो नास्तीत्यादौ घटात्यंताभावत्वप्रक
रक एवोत्सघते॥ ननु तत्संसर्गाभाववत्त्वप्रकारकबोधः॥ तथानुभवस्य

का

विदमस्त्वलात्॥ तथा चात्यंताभावत्वमेव नेत्रज्ञास्यतावच्छेदकं न तु संसर्गा
साध्यमपि॥ न चैवं संसर्गाभावश्रेतिगंधविरोधः॥ स्यावच्छिन्नप्रतियोगिताकत्व

॥६९॥

सम्बन्धेन संसर्गविशिष्टाभावस्य तदर्थत्वात्। तादृशोऽभावश्चोपदर्शितरीत्याव
स्तुगत्या अत्यंताभाव एवेत्यत्यंताभावत्वस्य नञ्शक्यतावच्छेदकत्वे क्षितिविरहः॥
न तु तथानुभावानंगीकारे अभावत्वस्यैव नञः शक्यतावच्छेदकत्वौ
चित्येन तादृशधर्मद्वयेन नञ्शक्यतावच्छेदकत्वाभ्युपगमो निरर्थ
कः॥ संसर्गाभावश्चेत्यादिग्रंथस्तु शक्यप्रदर्शनपरो न तु शक्यतावच्छे
दकप्रदर्शन इनानुपपत्तिचेन्न॥ अत्यंताभावत्वाद्यतिरि।क्ताभावत्वेप्र
माणाभावेन तथावक्तुमशक्यत्वात्॥ अभाव इत्याकारकप्रतीतिरव
रत्यंताभावत्वान्योन्याभावत्वध्वंसत्वाद्यन्यतमत्वाविषयत्वाभ्युपगमे
न तद्विषयतयापि तत्सिद्धेरभावात्। न चैवं लाघवान्नञ्शक्यतावच्छेदक

॥६९

तयातत्सिद्धिरितिवाच्यं॥लाघवानुरोधेनशक्यतावच्छेदकतयाऽतिरिक्तधर्मस्वी
कारे विष्णुपदशक्यतावच्छेदके पाविष्णुत्वत्र प पदार्थेतरसिद्धिप्रसंगात्॥
नानार्थोच्छेदप्रसंगाच्च॥तत्रापिसर्वसाधारणातिरिक्तधर्मविशेषंस्वीकृत्यतत त्रे
स्यैवशक्यतावच्छेदकत्वस्वीकारोचित्यात्॥एवमभावत्वस्यनञःश
क्यतावच्छेदकत्वेनञ्पदादिकंमादायाव्यवदभावोपस्थितिरुत्पन्नागौरव
मपिदुष्परिहरमेव अत्यंताभावत्वान्योन्याभावत्वयोर्नञःशक्यताव
च्छेदकत्वेतुअत्यंताभावत्वविशिष्टेशक्तिज्ञानकालेऽत्यंताभावानामुप
स्थितिःअन्योन्याभावत्वेविशिष्टेशक्तिज्ञानकालेचान्योन्याभावानामुपस्थि
तिः॥

॥७॥

नतु नञ्पदात्सर्वत्र एकदापानदभावविशिष्टकोपस्थितिर्जायत इति लाघ
वमखंडितमेवेति॥ नन्वेवं सति घटो नास्तीत्यादिसमभिव्याहारतानवा
र्यतावच्छेदके घटे प्रतियोगिकात्यंताभावादि प्रविषयकशाब्दबुद्धित्वं न
तु घटत्वावच्छिन्नं प्रतियोगिताकाभावबुद्धित्वं तत्रावच्छिन्नत्वानिवेशे महा
गौरवात्॥ तथा च यत्किंचिद्घटवतीभूतले घटो नास्तीत्यादिवाक्यो
तथाविषयप्रमात्मकबोधोत्पादेन तत्र तादृशवाक्यस्य प्रमाणताप
त्तिरित्यत आह॥ तत्रेति॥ नञर्थसंसर्गाभावे अन्योन्याभावे चेत्यर्थः॥ आन
यितावच्छेदकावच्छिन्नप्रतियोगिताकत्वमिति॥ नञ्पदजन्यशाब्दबोधे अभावविशेषणीभूतप्रतियोगिविशेषणावच्छिन्नप्रतियोगिप्रकारकत्वमित्यर्थः॥ सुप

७॥

न्तेबलात्सिद्धमिति॥ नञ्पदसमभिव्याहृततरपदज्ञानप्रयोज्यमिति अर्थः॥ नञ्प
दसमभिव्याहृतेतरपदज्ञानात्तथाविधज्ञाद्बोधे एवोत्पद्यत इति॥ तत्रेत्यादि॥
सिद्धमित्यंतस्य पर्यवसितार्थः॥ अन्यथा दूषणमाह॥ इत्याद्यव्यवहारादिति॥
इत्यादिवाक्याज्ज्ञानात्प्रमात्मकबोधानुदयादित्यर्थः॥ तथा च गौरवसत्वेपि
उपदर्शितसमभिव्याहारज्ञानस्य कार्यतावच्छेदकमुपदर्शितप्रकारकत्व
मवश्यं वक्तव्यं॥ अन्यथा दर्शितबोधस्य विद्यमानत्वात्॥ तथा च यत्किंचिद्घ
टवति घटत्वावच्छिन्नप्रतियोगिताकाभावसत्वेन तत्र ते घटो वास्तीति वाक्या
त्प्रमात्मकबोधानुदयात्तत्र तादृशवाक्यस्य प्रामाण्यमिति भावः॥ दूषणां
तरमाह॥ पीतघटवटंतीत्यादि॥ इत्यादिव्यवहारादित्यादौ नीलघट

त्यावच्छिन्नप्रतियोगिताकाभावस्यानुभवात्॥ तथा च नञ्जन्यतावच्छेदककोटौ अन्व
यितावच्छेदकावच्छिन्नप्रतियोगिताकत्वविषयताया अनिवेशेनादृशाभावा नु
पत्ता प्रसक्तेति भावः॥ अत्रेदं तत्त्वं। यत्रान्वयितावच्छेदकावच्छिन्नप्रतियोगित्वं
प्रसिद्धं॥ तत्रान्वयितावच्छेदकावच्छिन्नप्रतियोगितासंबंधेन धावच्छिन्नतां
दृशप्रकारताया एवं तादृशासमभिव्याहारादिज्ञानकार्यतावच्छेदकत्वं ॥१८॥
॥१८॥ कंबुग्रीवादिमान्नास्तीत्यादौ नञ्पदसमभिव्याहारज्ञानकार्यतावच्छे
दकं न कंबुग्रीवादिमत्त्वावच्छिन्नप्रतियोगितासंबंधावच्छिन्नतथाविध
प्रकारताशालित्वं गुरुधर्मे अभावप्रतियोगितावच्छेदकत्वाभावे
न कंबुग्रीवादिमत्त्वावच्छिन्नप्रतियोगितायाः अप्रसिद्धत्वेन तथाव

तुमश्रुयक्यत्वात्॥ किंतु तत्र कंबुग्रीवादिमत्वावच्छिन्नत्वनिष्ठसांसर्गिकविषयताएव तत्वं
तथा सति नानुपपत्तिः तादृशशंखप्रजन्यबोधे प्रतियोगिन्यां शंखे कंबुग्रीवादिमत्वावच्छि
न्नत्वस्यभ्रमत्वस्वीकारात्॥ नन्विदमनुपपन्नं॥ भ्रमत्वं हि तदभाववतीतत्प्रकारक
त्वं॥ तथा च सांसर्गिकविषयतायांप्रकारकत्वविरोधित्वाभावेन संबंधांशे भ्रमत्वं
दुरुपपन्नं ~~मत्वं~~ न च तदभाववद्विशिष्टविषयता ~~निरूपित~~ ज्ञानत्वमेव भ्रमत्वमिति
वाच्यं॥ तथा सति इदं रजतमिति ज्ञाने इदमंशे भ्रमत्वापत्तेरिति चेन्न॥ सांसर्गिक
विषयतायामपि प्रकारत्वविशेष्यत्वांगीकारात्॥ न चैवं सति प्रतियोगितायां कंबुग्री
वादिमत्वावच्छिन्नत्वाभावनिर्णयदशायां कंबुग्रीवादिमन्नास्तीति प्रतीत्यनुद
यापत्तिः॥ अवच्छिन्नमते तस्यास्तादृशबोधं प्रति बाध्यतावच्छेदकाक्रांतत्वादिति वाच्यं॥

वा

शे

12

इष्टापत्तेः॥ बोधप्रतिबध्यतावच्छेदककोटौ प्रकारतायां सांसर्गिकविषयताभिन्न
त्वस्यवानिवेशात्॥ केचित्तु॥ कंबुग्रीवादिमान्नास्तीत्याद्यावाभावो घटत्वावछि
न्नप्रतियोगितासंबंधेन कंबुग्रीवादिविशिष्टस्य भानमुपेयते। तथाचेयं
प्रतीतिः॥ कंबुग्रीवादिमत्वविशिष्टंशोभ्यमात्मिका अन्वयितावच्छेदकावछि
न्नप्रतियोगित्वस्यैवान्वयितावच्छेदकविशिष्टस्य संबंधत्वांगीकारेण प्रकृते घ
टत्वावछिन्नप्रतियोगितायां कंबुग्रीवादिमत्वविशिष्टस्य संबंधत्वाभावे
न तेन संबंधेन तदभाववति अभावे तत्प्रकारकत्वस्यैवाविद्यमानत्वात्।
अथवा अभावबुद्धौ सर्वत्राभावांशे प्रतियोगितासंबंधेन प्रतियोगिनो भानवदवछि
न्नप्रतियोगितासंबंधेनान्वयितावछेदकस्यापि भानं॥ ||||||||||||||||||||||||

अंगीकारे: तथा च कंबुग्रीवादिमत्त्वावच्छिन्नप्रतियोगिताया अप्रसिद्धत्वेन कंबुग्रीवादि
मन्नास्ति इत्यादौ घटत्वावच्छिन्नप्रतियोगितासंबंधेनैव कंबुग्रीवादिमत्त्वस्य भाना
पगमे कं धैं तस्याः कंबुग्रीवादिमत्वांशेऽत्र मत्त्वमुपेयते घटत्वावच्छिन्नप्रतियोगिताया
घटत्वस्यैव संबंधेन तत्र तेन संबंधेन कंबुग्रीवादिमत्त्वाभाववति अभावे कंबुग्री
वादिमत्त्वप्रकारकत्वस्य सत्त्वात्॥ न चैवं स्वनत्राभावप्रतीतौ स्वावच्छिन्नप्रतियो
गिताकत्व संबंधेनान्वयितावच्छेदकभानांगीकारे घटो नास्तीति प्रतीतेर्घटेत्वं
नास्तीत्याकारकैतापत्तेः॥ अभावांशे घटत्वविषयकस्यैव ज्ञानेन तदाकारकत्वा
दिति वाच्यं॥ यत्र स्वातंत्र्येणाभावांशे घटत्वं भासते तस्यैव तदाकारत्वात् न
च स्वातंत्र्येण घटत्वस्य भानं मानाभावातिरिक्तांशे अप्रकारित्वस्य घटत्वस्य मानं भा

त्व

13

॥१०॥

तथाच यत्र घटो नास्ति घटत्वं च नास्तीति समूहालंबनात्मिका प्रतीतिः॥ तत्र तस्या घटत्वं
नास्तीत्याकारकत्वानुपपत्तिः तत्राभावातिरिक्तांशे घटे घटत्वस्य प्रकारत्वेन तत्र तस्य
स्वातंत्र्येणाप्रकारत्वादिति वाच्यं॥ घटनिष्ठविषयतानिरूपितसमवायसंबंधावच्छि
न्नघटत्वविषयताभिन्नाभावनिष्ठविषयतानिरूपितघटत्वविषयताया एव स्वातंत्र्ये
ण घटत्वभानवदार्थत्वात्॥ उक्तसमूहालंबने च घटविषयतानिरूपितघटत्ववि
षयतातो भिन्नापि अभावविषयतानिरूपितघटत्वविषयतां गिक्रियते॥ इति तथा
विधविषयताभिन्नाभावविषयतानिरूपितघटत्वविषयतारूपस्वातंत्र्येण घ
टत्वभानपदार्थस्य सत्वेन तदाकारकारणतायां बाधकाभावादिति भावः॥ एवं लो
हितो वह्निर्नास्तीत्यादौ वह्नित्वावच्छिन्नप्रतियोगितामेव संबंधविधया भासते न तु लोहि
त्यविशिष्टवह्नित्वावच्छिन्नप्रतियोगित्वं लोहित्यविशिष्टवह्नित्वस्याप्रसिद्धत्वादिति॥

॥१०॥

नचैवमन्वयितावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नप्रतियोगितासंबंधेनाभावं
तु प्रतियोगिनोभानस्य नञ्पदजन्यशाब्दबोधे नियमानेयंरितिः॥ संभवतीतीवाच्यं॥
म्य अन्वयितावच्छेदकतापर्याप्त्यधिकरणावच्छिन्नप्रतियोगित्वं प्रसिद्धं यत्र तत्र तादृशा
नियमांगीकारेणानुपपत्त्यभावादित्यादिबहुतर नीलो घटो नास्तीत्यादौ अभा
वोपरिनीलघटत्वावच्छिन्नप्रतियोगितासंबंधेन नीलघटं विषयीकृत्य बोधो
त्पादस्तु गुरुधर्मस्य प्रतियोगितावच्छेदकत्वांगीकारेण अन्यथा तत्र। न्वयि
तावच्छेदकीभूतपदच्छेदसंबंधेन घटितसामानाधिकरण्यसंबंधेन नीलघट
त्वं तत्समवायसंबंधघटितसामानाधिकरण्यसंबंधेन नीलरूपविशिष्टं यद्घ
टत्वं तदपेक्षया गुरुतया अभावप्रतियोगितानवच्छेदकत्वेन तदवच्छिन्नप्रति
योगिताया अप्रसिद्धत्वेन तेन संबंधेन तत्र नीलघटस्यासंभवादिति तन्न। गु

रूधर्मस्यप्रतियोगितानवच्छेदकत्वेपिकंबुग्रीवादिमन्त्वास्तीत्यादाविवउपदर्शितरी
त्याअत्रापिबोधसंबंधेनानुपपत्त्यभावात्॥ ननुभूतलेनघटइत्यादौनञ्ज
न्यशाब्दबोधेकथंनञ्घटसंसर्गाभावोभासते॥ नचनञजन्यसंसर्गाभा
वविषयकशाब्दबुद्धिंप्रतिअनुयोगिबोधकपदसमभिव्याहृतसप्तमीपदज्ञा
नत्वेनहेतुत्वान्नतत्रतथाविधापत्तिरितिवाच्यं॥ चैत्रेणपच्यतीत्यादिवाक्य
जन्ययाकान्वेकूलकृत्यभावविषयकशाब्दबोधेव्यभिचारेणतयोर्हेतुह
क्यत्वात्॥ इत्यतआह॥ प्रतियोग्यभावान्वयाविति॥ अभावान्वयः प्रतियो
ग्यन्वयेनतुल्ययोगक्षेमइत्यर्थः॥ यत्रयत्प्रतियोगितिरूपितसंबंधः॥ संबंध
विधयाभासतेनञपदसमभिव्याहारेसतितदभावसंबंधोपिसंबंधविधया
भासते॥ यत्रयत्प्रतियोगिकसंबंधःप्रकारविधयाभासतेनञ्समभिव्या

हरेसतितदभावसंबंधोपितथैवेतितुपर्यवसीतोर्थः॥अत्रप्रथमोक्तमन्नघउदा
हरति॥तेनेत्यादिना॥तेनउपद र्शिततुल्ययोगक्षेमनियमेनआधाराधेय
संबंधेनेवान्वयः॥अ धाराधेयसंबंभोवधस्यसंबंधविधयैवान्वयः॥संस
र्गाभावस्यसंसर्गाभावसंबंधस्यतविधयैवान्वयइत्यंनंतरमितिपूरणीयउ
पदर्शितफलितार्थस्योदाहरणं॥ तथापचतिचैत्रइत्यादि॥वैय्याकरणमते
आख्यातस्यकर्तृवाचकतयानपचतिचैत्रइत्यादौपाकोनुकूलकृत्तुरन्योन्या
भावएवप्रतियतइत्युपदर्शितोर्थोदाहरणन्नतत्रसंभवतितिउदाहरणां
तरमाह॥चैत्रस्येस्यदं चैत्रस्येत्यादिनाप्रथमांतपदोपास्थापितएवतथा
प्रथमांतपदोपस्थापितेचैत्रादावाधाराधेयभावसंबंधस्यसंबंधविध
याअन्वयः॥तदभावस्यापीति॥तिङाद्युपस्थापितकृत्याद्यभावसंबंध

दावा
॥१२॥

स्यापितव्या॥ संबंधविधयान्वयः॥ तथा च यद्विशेष्यकयत्संसर्गकयत्प्रकारकशाब्दबु
द्धिं प्रति यादृशयादृशसमभिव्याहारज्ञानं कारणं॥ यद्विशेष्यकतत्संसर्गा
वच्छिन्नप्रतियोगिकतदभावप्रकारकविशेषणताविशेषसंसर्गकशाब्दबुद्धिं
प्रति तादृशसमभिव्याहारविशिष्टादिज्ञानस्य हेतुत्वादिति भावः॥ ननु नेदं चै
त्रस्याधाराधेयभावावच्छिन्नप्रतियोगिताकाभावान्वयबोधोदाहरणप्रदर्शनि
मसंगतं॥ तत्र षष्ठ्यर्थस्य स्वामित्वरूपतया तस्य निरूपकत्वसंबंधावच्छिन्न
प्रतियोगिताकाभावस्यैव बोधादित्यत आह॥ षष्ठ्यादेरित्यादि॥ स्वत्वे चैत्र
निरूपितत्वप्रदर्शनं तु तेन संबंधेन स्वत्वे चैत्रस्यान्वयप्रकल्पनेन निरूप
कत्वसंबंधावच्छिन्नप्रतियोगिताभावस्य नेदं चैत्रस्येत्यादि॥ बोधनान्नो
क्तानुपपत्तिरित्यत आह॥ निरूपकत्वादेः संबंधस्येति॥

॥१२॥

ष्टत्वे स्वनियामकतयेति चेन्न॥ तथा च दृष्टत्वनियामकसंबंधेस्यैवाभावप्रतियोगितावच्छे
दकत्वेनीरूपकत्वसंबंधस्य स्वनियामकतया तत्संबंधावच्छिन्नप्रतियोगितावत्त्वस्वामि
त्वाभावस्याप्रसिद्ध्या नेदं चैत्रस्य स्यादेतदभावो वा संभवेनाप्रिवृरवूरणतो संबंधा
वच्छिन्नप्रतियोगिकस्वामित्वाभावबोधस्यैवाभ्युपगमे चैत्रधनेऽपि नेदं चैत्रस्येति
व्यवहारस्य दुरुपपन्नतया षष्ठ्याः स्वत्वार्थकत्वां गीकारस्यावश्यकतया नेदं चैत्रस्ये
त्यादौ वाधारादेयत्वाभावसंबंधावच्छिन्नप्रतियोगिताकाभावान्वयबोधोदाहरणप्रदर्श
नेनासंगतमिति भावः॥२॥ इदं तु स्वनियामकसंबंधस्याभावप्रतियोगितावच्छेदकता
नंगीकृत प्राचीनस्य मते उक्तं॥२॥ स्वमते तु स्वनियामकसंबंधस्याप्यभावप्रतियो
गितावच्छेदकतया निरूपकत्वसंबंधावच्छिन्नप्रतियोगिताकस्वामित्वाभावस्यापि

॥१३॥

प्रसिद्धतयानेदं चैत्रस्येत्यादिनिरूपकतासंबंधावच्छिन्नप्रतियोगिताकस्वामित्वाभावबोधे
बाधकाभावेन नाधाराधेयभावसंबंधावच्छिन्नप्रतियोगिताकाभावबोधोदाहरणमुपद
र्शितस्मृत्युक्तेरसंगतमेवेति ॥ वस्तुतस्तु षष्ठ्याः स्वामित्वार्थकत्वमतेपि विनिगमना
विरहेण स्वत्वार्थकत्वस्यापि संभवेनानेदं चैत्रस्येत्यादावाधाराधेयभावसंबं
धावच्छिन्नप्रतियोगिताकस्वत्वाभावस्यापि बोधसंभवेन तत्र तथोदाहरण
प्रदर्शनेनाप्यसंगतमिति ध्येयं ॥ यत्र प्रतियोगिनः संबंधः प्रकारविधया भासते
इत्येतन्निर्वाहकाकारणमावश्यकत्वेन पुरःसरमुदाहरणमाह ॥ यत्र चैत्रे स्वत्वादि
नानासंबंधविधया भासते ॥ इत्येतन्निर्वाहकार्यमन्वयत इत्यनंतरं अपितु प्र
कारविधयैव भासत इति पूरणीयं ॥ यत्रानुयोगिपदे सप्तम्यर्थपेक्षा इत्यनं

॥१३॥

तर इति अभावसंबंधप्रकारबोधेप्यनुयोगिवाचकपदे सप्तपेक्षेति पूरणीयं॥ तथाच यत्र प्रति
योगिनउच्चाराचेपभावसंबंधः प्रकारविधयाभासते तत्र तत्प्रकारकशाब्दबुद्धिं प्र
त्यनुयोगिवाचकोत्तरसप्तमीपदज्ञानं कारणमित्यर्थः॥ अन्यथा यत्र प्रतियोगि
नः संबंधः प्रकारविधयाभासते तत्र नञ्समभिव्याहारे सति तदभावसंबंधः
प्रकारविधयाभासत इति। नियमानुपपत्तिः॥ अन्यथा यत्र प्रतियोगिनः। एते
न भूतलं न घट इत्यादौ घटाभावसंबंधप्रकारकबोधापत्तिर्निरस्ता। अत्र तेन नञ्
पदसमभिव्याहृतानुयोगिवाचिकपदोत्तरसप्तमीपदज्ञानरूपकारणाभावेन
तथाबोधोत्पादासंभवादिति॥ अत्र च घटाभावादिविशेष्यकभूतलवृत्तित्वा
दिप्रकारकशाब्दबुद्धिं प्रति घटबोधकपदसमभिव्याहृतं यद्भूतलपदोत्तरस

प्तमीपदसमभिव्याहृतं नञ्पदं तज्ज्ञानत्वेन हेतुत्वमित्येवंरीत्या कार्यकारणभावो
बोध्यः ॥ नन्वभावसंबंधप्रकारकबोधोदाहरणं भूतलेन घट इत्यादौ न संभवति ॥
तत्र घटादौ भूतलवृत्तित्वाभावप्रकारकबोधस्यैवोदयादित्यत आह ॥ अन्येत्यत्र ३
दिगंतधीश्च भूतलेन घट इत्यादौ पदार्थभूतलवृत्तित्वप्रकारकघटाभावविशे
॥१४॥ ष्यकबोधे तात्पर्यं तदा तस्माद्भूतलवृत्तिर्घटाभाव इत्याकारकबोधस्यैवोत्प ॥१४॥
त्यानत्तत्र तथोदाहरणमसंगतमिति भावः ॥ तादृशवाक्यात्कदाचिद्घटवि
शेष्यकभूतलवृत्तित्वाभावप्रकारकबोधस्याप्युत्पत्तेरित्यत्र युक्तिमाह ॥ अत एवे
त्यादिना ॥ एवानुयोगिवाचकपदोत्तरसप्तमीपदसमभिव्याहृतनञ्पदस्थले क
दाचित्प्रतियोगिविशेष्यकानुयोगिवृत्तित्वाभावप्रकारकबोधोत्पादादेवेत्य

एकविशेष्यकानुभवः॥ एकविशेष्यकानुभावोनुपपन्नः॥ तथाचयत्रस्थलेकदाचित्तथावि
घबोधोसादानभ्युपगमेपृथिव्यांगंधोनजलइत्यादौगंधादिविशेष्यकपृथिवीवृत्ति
त्वजलवृत्तित्वाभावप्रकारकानुभवोव्याहन्येतिभावः॥ यत्तुतत्रनघटइत्यादौन
घटाभावादिविशेष्यकस्तुतत्रवृत्तित्वादिप्रकारकबोधोत्पद्यते॥ अपितुघटोऽस्तुतत्र
वृत्त्यभावीयइत्याकारकबोधःइतितन्मतंदर्शयति॥ सप्तम्यर्थान्वयिनइत्यादिना॥
प्रतियोग्यंशेसप्तम्यर्थान्वयिनोऽभावस्यविशेषणत्वेनैवतादृशवाक्यजन्यबोधे
भानमित्यर्थः॥ तादृशभानस्यात् घटादिविशेष्यकप्रतियोगितासंबंधेनप्रतियोगीअ
भावोपरिभासतइतिनियमभंगप्रसंगोऽस्वरसःसूचितः॥ नञसमभिव्याहार
स्थलेयद्विशेष्यकयादृशविशेविशेषणस्यान्वयबोधः॥ नञसमभिव्याहार
स्थलेनजातद्विशेष्यकतादृशविशेषणभावोबोध्यतइतिनियमगादिना

मतमाह॥ केचित्त्विति॥ सर्वत्रेत्यादि॥ नञसमभिव्याहारस्थलेयद्विशेष्ययादृशविशे
षणस्यशाब्दबोधोनञसमभिव्याहारस्थलेपिनञातद्विशेष्यताद्दृशविशेषणा
भावोबोध्यतइत्यर्थः॥ उपदर्शितनियमबलादितिभावः॥ अत्रानुकूलतर्कमाह॥
अतएवेति॥ नञसमभिव्याहारस्थलेयद्विशेष्ययादृशविशेषबोधः॥ नञसमभि

नञा

व्याहारस्थलेपितद्विशेष्यताद्दृशविशेषणाभावःप्रतीयतइतिनियमादेवेत्यर्थः॥

॥१५॥

वचनैक्यनियमइति॥ क्रियापदघटपदयोःसमानवचनत्वनियमोप्युपपन्नइत्य ॥१५

र्थः॥ अभावविशेष्यबोधांगीकारेघटौनस्तइत्यादौद्विवचनानुपपत्तिः॥ क्रि
यापदस्यहिवचनादिकंविशेष्यद्वित्वादिबोधेस्थलएवसम्भवतीतिनियमेन
तत्रभावरूपविशेष्येद्वित्वादिबोधाभावेनक्रियापदस्यद्विवचनासंभवात्॥ ए

वच

वंतत्रक्रियायानस्यएकवचनापत्तिः॥ विशेष्यद्वयेकवचबोधस्थलेक्रियापदस्यै

कवचननियमात् मन्मते तु विशेष्यीभूत घटे द्वित्वादिबोधेन क्रियापदस्या
पि द्विवचनाद्युपपत्तिः॥ एवं क्रियापदस्यैकवचनस्यापत्तिरिति पिन संभवति॥ त
त्र विशेष्यीभूत घटादौ एकत्वाबोधनादिति भावः॥ यद्येतन्मतेपि तत्र द्विवच
नाद्यनुपपत्तिः स्यादेवस्यैव॥ तथा हि॥ एतन्मते भूतले घटौ न स्त इत्यादौ सप्तम्या
निरूपितत्वार्थकतया आधेयतो विद्यमानार्थकतया आख्यातस्याश्रयत्वार्थ
कतया नञो अभावार्थकतया भूतलनिरूपित विद्यमानत्वाभाववंतौ घ
टौ इत्यादिबोध उत्पद्यते॥ तथा च यत्र क्रियापदस्य द्विवचनानुपपत्तिः॥ तदर्थस्य
विशेष्ये द्वित्वादेरबोधनात्॥ घटद्वयादेस्तु द्विशेष्यत्वाभावादिति तत्त्वं॥ परंपरया
घटद्वयादेरपि क्रियापदार्थविशेष्यत्वेनानुपपत्त्यभावात्॥ उपदर्शितनिय

मेसाध्यात्परं परासाधारणविशेषणत्वस्य निवेशेनानुपपत्त्यभावात्। केचिन्म
तं दूषयंति॥ तेषामित्यादिना गतिभिन्नं तन्नीयासत्तापदस्य सत्तासमवायेलक्ष
णं विना गत्यंतराभाव इत्यर्थः॥ तथाचैतन्मते तत्रसत्तापदस्य लक्षणार्थकल्प
नापत्तिर्न्मतेतु सा न सत्ताभावे जातिवृत्तित्वबोधे बाधकाभावादिति भावः॥ तत्र
लक्षणाकल्पनं विनागत्यभावमेवोपपादयति॥ जातिसमवेतत्वास्येत्यादि
ना॥ संबंधांतरेणैकार्थसमवायादिसंबंधेन न च सत्तायां स्वरूपसंबंधावच्छिन्न
जातिवृत्तित्वाभावबोधे बाधकाभाव इति वाच्यं॥ तथासति जातौ न सत्तेत्यादिव
त् घटादौ न सत्तेत्यादिप्रयोगापत्तिरिति ध्येयं॥ ननु श्रूतत्वे घटो न स्तइत्यादौ
वस्त्वभावविशेषत्वबोधांगीकारे उपदर्शित श्रुत्यादिवचनानामनुपपत्तिर्दुरुद्ध
रैवेति काच्यं॥ चेन्न॥ क्रियापदस्य विशेष्यत्वा चक पदसमानवचनत्वनियम

न ४

वत्॥ नञ्समभिव्याहृतक्रियापदस्थले क्रियादस्य प्रतियोगिवाचिकपदसमान
वाचकत्वानियमांतरस्य कल्पनेनानुपपत्यभावादिति॥ ननु नञ्समभिव्याहार
स्थले अभावविशेष्यकबोधांगीकर्तॄणां मते भूतले घटो नास्ति इत्यादौ कथ
मन्वयबोधः॥ तावद्भूतलवृत्तित्वविशिष्टस्य घटरूपस्याभावोस्तीत्याद्यप
द्याकारकबोधः॥ उत्पत्तुमर्हति॥ घटरूपवती भूतले इह भूतले घटो ना
स्तीति प्रयोगापत्तेः॥ एतद्भूतलवृत्तिघटादिरूपाभावस्य पर्वतादौ वर्त्तमानत्वा
त् नापि सप्तम्या निरूपितत्वार्थकतया एतद्भूतलवृत्तिनिरूपितविषमानत्वा
दिमत्वयत्ववान् घटरूपाभाव इत्याकारकबोधः संभवति सप्तम्या निरूपि
तत्वलक्षणाकल्पनापत्तेरितिचेन्न॥ भूतलवृत्तित्वविशेषावच्छिन्नघटरू

20

वो

।ति प्रतियोगिताकाभावअस्तित्वाश्रय इत्याकारकबोधात्पगमादिति दिक्॥ ननु
क्त तन्ने घटो नास्तीत्यादौ कथं नान्योन्याभावबोध इत्यत आह॥ यत्र चेत्यादि॥ अ
भेदेन। अभेदसंबंधेन॥ ननु तत्र किं नियामक इत्यत आह॥ तत्र चेति॥ नञ्पद
जन्यान्योन्याभावबोधे इत्यर्थः॥ समानविभक्तिकत्वं तत्र नियमितं॥ विशेषणवाचक
पदसमानविभक्तिकविशेष्यवाचकं पदं प्रयोजनमित्यर्थः॥ तथा च नञ्प
दजन्यान्योन्याभावबोधे। पिताहृशपदेन असमभिव्याहारज्ञानस्य हेतुत्वकल्प
नान्नोपदर्शितस्थले अन्योन्याऽभावबोधः दधिनसुंदर मित्यादौ तु सर्वविभक्त्यर
नुसंधानादेव बोध इति भावः॥ ननु पदर्शितकार्यकारणभावसंभवः॥ नस्तो
कं पचतीत्यादौ अन्योन्याऽभावबोधे व्यभिचारात् तत्र विशेष्यवाचकपदोत्तर सु
प्विभक्ते श्रवणाभावेनोपदर्शितकारणाभावात् एवं वैयाकरणमते चैत्रेण
॥॥॥॥॥ पचत्यादौ चैत्रे पक्वभेदान्वयबोधे सत्त्वात्तत्रव्य॥॥॥॥॥

१७॥

१७

ती

भिचारात्तत्रापि विशेषणवाचकाख्यपदोत्तरविभक्तेरभावेनोपदर्शितकारणाभा
वादित्यत आह। विरुद्धविभक्तिविरहो वेति॥ अत्र विरुद्धविभक्ते शब्दार्थश्च
विशेष्यवाचकपदोत्तरविभक्तिवृत्तिप्रथमात्वाद्यभाववती विभक्ति चोधि
कोचेद्विशेषणवाचकपदोत्तरविभक्तिवृत्तिप्रथमात्वाद्यभाववती विभक्तिः त
धाचान्योन्याभावो घेवक्चिद्विशेष्यबोधकपदोत्तरविभक्तिवृत्तिप्रथमात्वाद्यभाववतीसु बिभक्तिः त
ववद्भिन्नत्वाभावविशिष्टविशेषणबोधकपदेन समभिव्याहारज्ञानं कारणं
कोचेद्विशेषणबोधकपदोत्तरविभक्तिप्रथमात्वाद्यभाववद्भिन्नत्वाभाव
विशिष्टविशेष्यबोधकपदेन समभिव्याहारज्ञानं कारणमिति रीत्या कार्यका
रणभावो बोध्यः॥ एतेन विरुद्धविभक्तिविरहो वेत्यादिना नञ्पदजन्यान्योन्या

भाव

॥१८॥

भावबोधे सर्वत्र विशेषणबोधक पदोत्तरविभक्तेर्दृष्टत्वे प्रथमाद्यायाघस्तावबाद्भिमस्या
भावविशिष्टविशेष्यबोधकपदनञ्पदसमभिव्याहारः कारणमिति प्रदर्शितं इदं
तु नञसंबध्यवार्तिनस्तोकं पचतीत्यादौ व्यभिचारादिति निरस्तं विषयव्यवस्था
या उपदर्शितरीत्या कार्यकारणभावकल्पनेन नानुपपत्तिभागादित्यलं बहुतरजल्पने
न॥ अतएवेति॥ नञञन्योन्याबोधे विशेषणवाचकपदादौ नञसमभिव्याहारज्ञान
स्य हेतुत्वादेवेत्यर्थः॥ यजतीष्वित्यादि॥ अत्रानुयाजेष्वित्यादावित्यस्य ऊयतीषु अ
नुयाजबोधो बोध्यत इत्यन्वयः॥ तथा च येयजामहं करोति नानुयाजेष्वित्यादे दा
वनुयाजाख्ययागविशेषभिन्नयागेषु येयजामहपदवंतं मंत्रं करोति उच्चारय
तीत्याकारकबोधो जात इत्यर्थः॥ कारणसत्वे कार्यासोदाऽनवस्थाभावादिति भावः॥
अत्र नयानिषेध्यबोधने बाधकमाह॥ एकवाक्येति॥ एकविधेयार्थत्वात्तदरोयाके

दित्यर्थः॥ अत्र नञ अन्योन्याभावबोधने अनुयाजभिन्नेषु यागेषु येयजामह पदवन्मंत्र
कारणरूपैकार्थविधानसंभवेन एकविधेयार्थकत्वरूपैकवाक्यत्वंसंभवाति ॥ तत्र न
अनिषेधबोधने च नैवं यागेषु येयजामह पदवन्मंत्रकरणविधानं अनुयाजेषु त
न्निषेधविधानमिति विधेयीभूतार्थद्वैविध्यात् वाक्यस्य तु विधेयीभूतैका
र्यत्वस्य संभवेनानाविधेयार्थकत्वरूपभिन्नवाक्यत्वकल्पनाया अन्याय्यत्वेनत
त्रैष्टापत्तिकरणस्य वाक्यत्वादिति भावः॥ अत्र नञ अनिषेधबोधने दूषणांतरमाह॥
येयजामह इत्यादेरित्यादिना॥ अत्रा करोतीत्यस्य परिग्रहः तथा चात्र ने
भानिषेधबोधने यागेषु येयजामहं करोति नानुयाजेषु येयजामहं करोतीत्याका
रकबोधेन करोति पदस्य येयजामहमिति पदस्य चानुषंगकल्पने गौरवादि

स्यर्थः॥ अनुषंगकल्पनां विनातु तादृशबोधो न संभवति॥ सरदुश्चरिते स्यादिव्युत्पत्ति
भंगप्रसंगादिति भावः॥ नन्वत्र निषेधबोधने नु पाजे छित्यत्र सप्तम्याः सार्थकत्वं सं
भवति अनुमाज्ञाधिकरणकतादृशनिषेधस्य बोधात्। तेनान्योन्याभावबोधनं च तथेति
सप्तम्यानैरर्थक्येन पूर्वोक्तदोषद्वयमस्त्वपेत्याशंक्य निषेधबोधकत्वमेव स्वमव्यु
॥१२॥ त्पत्तिमित्यताह॥ विशेषणविभक्तिरित्यादि॥ तथा चात्र नञोऽन्योन्याभावबोधेऽपि विशेष ॥१२
णविभक्तेः प्रयोगसाधुत्वरूपप्रयोजनसंभवेन अननैरर्थक्यमिति भावः॥ ननु सर्व
त्र विशेषणविभक्तेः विशेषणप्रयोगसाधुत्वे नीलो घट इत्यादौ अभेदसंबंधे
नैव घटे नीलस्यान्वयबोधः स च न संभवति। नामार्थयोः साक्षादन्वयस्याव्यु
त्पन्नत्वादित्यत आह॥ नामार्थयोरित्यादि॥ अभेदातिरिक्तसंबंधेन॥ तत्रत्यात्ते
नुरूपात्। तथा चाभेदातिरिक्तसंबंधावच्छिन्ननामार्थनिष्ठप्रकारतानिरूपित

विशेष्यतासंबंधेन शाब्दबुधिं प्रति विषयतासंबंधेन विभक्तिपदज्ञानजन्योपस्थितेर्हे
तुत्वस्य कल्पनात्तान्नोक्तानुपपत्तिः। तत्राद्ये मे संबंधेनैव नामार्थोपरि अपरपरन्वाभा
र्थस्य प्रकारतया तादृशशाब्दबोधे स्योक्तकार्यतावच्छेदकसंबंधेनानुपपत्त्या अनु
पपत्त्यभावादिति भावः॥ मतांतरमाह॥ लाघवेनेत्यादि॥ लाघवं च तत्र जन्यता
वच्छेदकसंबंधे अभेदातिरिक्तसंबंधेत्यानिवेशेन तयोः नामार्थयोः तथात्वं
विभक्तिजन्योपस्थितेस्तत्रत्वं॥ नन्वेवं सति नीलो घट इत्यादौ विशेषणविभ
क्तिजन्योपस्थितिं विनापि कथं अभेदान्वयबोधस्तत्राह॥ विशेषणविभक्तेरपि
ति॥ अभेदार्थकोसर्वत्र अभेदार्थिका तथा च तत्र विभक्तिजन्याभेदबोधं वि
नापि बोधानंगीकारस्मृतिर्भावः॥ ननु यत्र विशेषणविभक्तेरभावस्तत्र का गतिरित्यत आह॥

नीलो घट इत्यादौ॥ तथा च तत्रापि यावल्लुप्तविशेष्यकेरननंसंधानं नास्ति तत्र नांगीक्रियते एव शाब्दबोध इति भावः॥ मते त्वित्यनेनास्वरसः सूचितः। स चेतन्मते नीलो घट
इत्यादौ लुप्तविशेष्यकेरनुसंधानं विनापि अनुभवसिद्धस्य शाब्दबोधस्यापलापो दृष्टव्यः॥ एतन्मतमेव समीचीनमाभाति॥ ॥ तथा हि। विशेषणविशेष्यकेरर्थभेदा
र्थकत्वमात्रोपस्य नीलो घटोस्तीत्यादावभेदप्रकारकबोधांगीकारे अवश्यं दोषा
ववान्नं घट इत्याकारक मानसप्रतिनीलो घट इति समभिव्याहारज्ञानादिघटि ॥२०
त शाब्दबोधसामग्र्याः प्रतिबंधकत्वं न कल्पते तन्मते तादृशशाब्दबोधसामग्री
दशायां घटविशेष्यक नीलाभेदप्रकारकयोग्यताज्ञानस्यावश्यकतया विशेषद
र्शनाभाव दशायां तदा तादृशप्रत्यक्षोत्पादापत्तेर्वीपरीतज्ञानोपायं तत्र प्रत्यक्ष
निर्णयं प्रति विशेषदर्शन हेतुत्व कल्पनेनेव वारणं संभवति। तथा विषकार्प

कारणाभावस्य च गुरुप्रयत्नैः बाधविचारे स्थापितत्वात्॥ विशेषदर्शने सत्येव तदभावव्या
प्यवत्तानिर्णयरूपपरामर्शबोधप्रतिबंधसत्वेतथाविधशाब्दबोधस्यानुत्पत्त्यादेरापत्ते
भे तत्रौदसंसर्गकशाब्दबोधांगीकारे तु तादृशप्रतिबध्यप्रतिबंधकाभावकल्पनमावश्य
कमेव अन्यथा तादृशशाब्दबोधसामग्रीकाले तथाविधप्रत्यक्षोत्पादस्य प्रकारां
तरेण णासंभवात् नचाभेदसंबंधेन तत्र तादृशशाब्दबोधांगीकारेप्यभेदसं
बंधावच्छिन्नप्रतियोगिताकनीलाभावप्रकारकघटविशेष्यकमानसंप्रति उपद
र्शितरीत्या तादृशशाब्दबोधसामग्र्याः प्रतिबंधकत्वासंभवेन लाघवस्यानयाचु
ल्यं मतद्वयेपि इति वाच्यं॥ तदाप्यभेदविशेष्यकनिरूपितत्वसंबंधावच्छिन्ननील
घटप्रतियोगिताकाभावप्रकारकमानसंप्रति तादृशशाब्दबोधसामग्र्या उपदर्शि
तरीत्या प्रतिबंधकत्वाकल्पनेनैतन्मते लाघवस्यानपायादित्यलमत्यजल्पनेन॥

अ

नराज्ञ इत्यादि ॥ नराज्ञः पुरुष इत्यादौ यथा पुरुषे षष्ठ्यर्थस्वत्वस्याभावः प्रतीयते तथापि त्रौ यागे
सप्तम्यार्थाभेदाभावः प्रतीयत इत्यर्थः ॥ न चैवं सति एतन्मतेन ओं न्योन्याभावः ॥ त्यत्र
पेण शक्तिकल्पनमनर्थकं सर्वत्र संसर्गाभाव शक्तित एव नञ्जन्यशाब्दबोधनिर्वाहात् ॥ अ
तएव न घट इत्यादौ विशेषणविभक्त्यर्थाभेदस्य संसर्गाभाव एव प्रतीयत इत्युपगमादिति वाच्यं ॥
तत्राभेदत्वप्रकारकशाब्दबोधस्यानुभवसिद्धस्यापलापमात्रेण निराकरणसंभवेन
तेन रूपेणापि नञः शक्तिकल्पनस्यावश्यकत्वात् ॥ केचित्तु यजतिषु ये यजामहं करोति
नानुयाजेष्वित्यादौ नञो निषेधकत्वे अनुयाजे ये यजामह पदवन्मंत्र विकल्पापत्तिः
यजतीषु ये यजामहं करोतीत्यनेन यागसामान्ये तत्प्राप्या तदंतर्गतानुयाजेष्वपि तस्य
प्राप्तत्वात् ॥ नानुयाजेष्वित्येन तेत्र तस्य प्रतिषिद्धत्वाच्चेति तत्र नञो निषेधकत्वं किंतु
भेदबोधकत्वमिति नानुयाजेष्वित्यादौ नञो भेदबोधकत्वे युक्तिमाहुः ॥ तन्मतं दू
षयितुं तदुपस्यति । यद्वेति ॥ करणनिषेध इति नानुयाजे । ष्वित्यादौ नञो ये यजामह

२९॥

पदवन्मंत्रकरणनिषेध्यबोधकनइत्यर्थः॥ विकल्पापत्तिरिति॥ अनुयाजेतादृशमंत्रस्य
करणाकरणापत्तेरित्यर्थः॥ उपदर्शितरीत्या तत्र तादृशमंत्रकरणस्याविहितत्वान्निषेध्य
त्वादिति भावः॥ विशेषनिषेध इत्यादि ब्राह्मणेभ्यो प्रदातव्यं न कौडन्यान दातव्यं इत्या
दौ विशेषनिषेधस्थले यथा ब्राह्मणेभ्यो दातव्यमिति सामान्यविधेः कौंडन्यातिरि
क्त ब्राह्मणसंप्रदानबोधकत्वं तथा प्रकृतेपि यजतीषु येयजामहं करोतीति सामा
न्यविधेरप्यनुयाजातिरिक्तयागे ये यजामहवन्मंत्रकरणप्रतिपादकत्वेना
नुयाजेतथाविधकमंत्रस्याप्राप्त्या विकल्पासंभवादिति भावः॥ ननु ब्रा
ह्मणेभ्यो दातव्यं। न कौडन्याय दातव्यमित्यादावपि सामान्यविधेः नाविशेषतरप
रत्वं॥ न च तथा सति कौडन्यस्यापि दधिना प्रसक्त्या विकल्पापत्तिरिति वाच्यं॥

घ

स्यात्द

तत्रौ नञो भेदबोधकत्वमभ्युपेत्य नानेकवाक्यतया कौण्डिन्यातिरिक्तब्राह्मणसंप्रदान
कदधिदानप्रतिपादनाभ्युपगमे चकोऽन्यप्रप्ताप्तनिषेधाप्राप्त्याच विकल्पान
वकाशात्॥ तथा च सामान्यविधेविशेषतरपरत्वकल्पनस्य निपुणैकृतया प्र
कृतस्थले नञो निषेधे कृत्याभ्युपगमे विकल्पापत्तिर्दुरैवेत्यत आह॥ नचैतिविर
।२२॥ धेकवचनत्वादिति॥ यद्येक नामार्थे अपरनामार्थान्योन्याभावबोधकनञ ।२२॥
स्थले विशेषणविशेष्यवाचकपदयोः समानविभक्तिकत्वं तत्र समानवचनस्या
पितन्त्रत्वेन प्रकृते तदभावात् तथा बोधसंभवादिति वः यो॥ नन्वेकनामार्थेप ३न
रनामार्थान्योन्याभावबोधे विशेषणवाचकपदविशेष्यवाचकपदयोः समा
घ नवचनत्वस्य तन्त्रत्वे प्रमाणाभावइत्यताह॥ नहि खल्विति सादिना॥ नामार्थयो
रभेदान्वयबोधे विशेषणविशेष्यवाचकपदयोः समानवचनत्वस्य बत

त्तत एवनञ उन्यान्योन्याभावबोधे स्तयोः स्तदायाति॥ नञ उन्यान्योन्याभावविषयकशा
ब्दबुधिं प्रति एकपदार्थे अपरपदार्थस्यादौ सौन्वयबोधकैकपदसमभिव्याहृताप
रपदेन नञ्पदसमभिव्याहारस्य ज्ञाने हेतुत्वादितल्लदार्गितं महतोराज्ञस्यनेन॥
नुने एकपदार्थे अपरपदार्थान्योन्याभावविषयकशाब्दबुधिं प्रति विशेषणबोध
कपदविशेष्यबोधकशाब्दबोधानुदयप्रसंग इति तत्र दनुभ्युपगम अवश्यकः तथा
च ब्राह्मणेभ्यो दधि दातव्यं नकौडिन्याय दातव्यमित्यादौ नञो अन्योन्याभावबो
धने बोधकाभाव इत्यतः पूर्वोक्तदोषोद्धार पुरःसर दोषांतरमाह॥ एकोनद्वाविंत्या
दिवर्द्दित्यादिना॥ तत्रनित्यद्दि वचनाघंत शब्दातिरिक्तस्तछलेत थाविधनि
यमस्वीकारे तु पूर्वोक्तदोषस्यापि दुरुधरत्वेतिसूचनाबमुक्तं। रूपंचिदि
ति। ब्राह्मणेभ्यो दधि दातव्यं नकौडिन्यायेत्यनेनैवकौडिन्यभिन्नब्राह्मणसंप्रदान

॥२३॥

नकदाचिदानबोधसंस्त्वाद्वितीयदातव्यपदं निरर्थकमिति भावः॥ अतएवेति॥ विशेषयंत एवं

निषेधस्थले सामान्यविधेर्विशेषेतरपरत्वमतएवेत्यर्थः॥ अन्यथा अमावास्यापि तृक्षयोद

यादित्यनेन रात्रौ श्राद्धकरणस्य च विहितप्रतिषिद्धकरणप्राप्त्या रात्रौ श्राद्धं न कुर्वीतेत्य

नेन तत्र श्राद्धकरणनिषेधस्य प्राप्त्या तत्र तत्करणस्य च विहितप्रतिषिद्धत्वात्‍ अत्याविक

ल्पापत्तेर्दुर्वारत्वादितास्यादिति भावः॥ ननु तत्रापि न जो अन्योन्याभावाभावकृत्यमित्यता

ह॥ नहीति॥ तत्रापि रात्रौ श्राद्धं कुर्वीतेत्यत्रापि रात्रीतरपरतान जो अन्योन्याभावोर्थ

कृतयरात्रीतरकाले श्राद्धकरणविधायकत्वाभ्युपगमे अन्योन्याभावस्यापि तृक्षयो

दयादित्येननेरात्रौ श्राद्धप्रसक्तेर्वैवरितपातत्वारणापत्तेः दुर्वारत्वादित्यर्थः॥

नुनेतथो॥ विधवाक्यार्थयोः वाक्येक वाक्यतया रात्रीतरा अमावास्यायां श्राद्धं कु

र्वीतेत्यर्थकत्वाभ्युपगमेन पूर्वोक्तकल्पोक्तदोष इत्यताह॥ नखल्विवत्यादि॥ इदं॥

॥२३॥

त्रौ श्राद्धं न कुर्वीतेति वाच्यं॥ तन्नैक्रियारहितं श्राद्धविध्यायकवाक्येन॥ नापि इदं रात्रौ
श्राद्धं न कुर्वीतेति वाच्यं॥ एवमपि क्रियारहितं॥ अनुषंगेण क्रियातिरिक्तक्रियार
हितं॥ केवलं क्रियारहितमित्युक्ते नानुषाङ्गे स्थितिवद्दृष्टांतसंगतेः तत्रानुषंगि क्रि
यावत्त्वादतः पृथगिति॥ तथा च तयोरेकैकवाक्यसंभवति॥ तयोरन्यतरवाक्यं क्रियार
हितं भवति॥ अन्यथा तयोरन्यतरवाक्ये क्रियापदस्येम अर्थापत्तेः॥ एवं च प्रकृतेवा
क्यद्वयस्यापि क्रियापदवत्तया एकवाक्यत्वासंभवेन पूर्वोक्त[illegible]लोप पूर्वोक्तदो
षः॥ पूर्वपक्ष एवेति सारः॥ ननु रात्रौ श्राद्धं कुर्वीतेत्यादिना निषेधबोधकत्वमपि न सं
भवति॥ यन्मते विशेषनिषेधैः छले सामान्यविधे विषयेतरपरत्वनियमे नामावा
स्यां पितृभ्यो दद्यादित्यादि सामान्यविधेः रात्रीतरपरत्वमावास्याकाले श्राद्धकरणस्य
विधायकत्वेन तत्र श्राद्धकरणप्रापकवाक्यांतरस्याभावेन तत्र तस्याप्रसक्तत्वात्

27

क्षती विरह इति भावः। निषेधविधिरिति। तादृशनियमस्वीकृत्या प्रसक्तस्य निषेधो ×४॥

दो

र्त्रिति सामान्यविधेर्विशेषेतरपरत्वमनभ्युपगम्यते न तत्र तत्प्राप्तौ तु विकल्पापत्तिरित्याकृते॥
अथ रात्राविव्यादिना॥ उपहासपूर्वकं समाधानमाह॥ साधीयानिति॥ तथा च प्रसक्तं हि
प्रतिषिध्यत इति नियमेन प्रमाणाभावेनाप्रसक्तस्यापि निषेधे बाधकाभावात्॥ रात्रौ श्राद्धं न
कुर्वीतेत्यादौ नञो निषेधबोधकत्वाभ्युपगमे इत्यादौ पूरणीयं॥ निषेधप्रवैयर्थ्यमिति॥ प्रसक्त
स्यैव प्रतिषिद्धत्वमिति॥ नियमे तु तत्र तत्प्रकरणस्यैव निषेधविधेः प्रयोजनत्वसंभव इति ता
दृशानियमाभ्युपगमे अवश्यकः तस्य विषयनियंत्रितत्वान्न दोष इति भावः॥ तात्पर्यनिर्व
बोधेति॥ रात्रीतरमावस्याक्रान्त्यादिकरणश्राद्धकरणबोधतात्पर्यनिर्णयात् प्रसक्तयत्ररात्रि
श्राद्धकरणं तद्वारणस्य प्रयोजनत्वादित्यर्थः॥ नन्वेवं सति विकल्पस्थलस्य दुर्बलत्वा
पत्तिरित्यत आह॥ एकविषयत्वेत्यादि॥ अनन्यगतिकतया विकल्पं विना गत्यंतराभाववेद्ये
या। तथा च तत्र विकल्पं विना प्रकारांतरासंभवेनावश्यं अभ्युपेतः तत्र विकल्पस्वीकारेण न वि
कल्पस्थलदुर्लभत्वापत्तिरिति भावः॥ अत्र विकल्पमुपपादयति॥ अन्न चेति॥ न षोडशिनं

ण्हातीत्यत्र चेत्यर्थः ॥ नञर्थाभावे विशिष्टस्यान्वयो ऽप्युपपन्न इत आह ॥ व्युत्पन्नस्येति ॥ तथा च ताद
नुव्युत्पत्तिविरहे प्रमाणाभाव इति भावः ॥ अत एव तादृशव्युत्पत्तेरभावादेव ननु नेत्यधिपा
चेर्थे प्रातियोगिकाभावस्यान्वयेन धात्वर्थाभावे विशिष्टस्यार्थान्वये नियमको भाव इत्यत आह ।
नियमस्त्वित्यादि ॥ तथा च यत्राखिलस्यार्थाभावबोधे तात्पर्यं तिष्ठति । विरोधोऽपि नास्ति तत्र तथा
बोधः ॥ यत्र तु धात्वर्थाभावे विशिष्टस्यार्थान्वयबोधे तात्पर्यं तत्र तथैवान्वयबोध इति नानियम
इति भावः ॥ ननु षोडशिग्रहणस्यागत्येनेष्टसाधनत्वाभावान्नातिरात्रे षोडशिनं गृह्णा
तीत्यादौ षोडशिग्रहणे इष्टसाधनत्वाभावबोधनेऽपि न ग्रहणविरोधेन धात्वर्थाभावे इ
ष्टसाधनत्वान्वये बोधाङ्गीकारे इत्यत आह ॥ मुख्यफलाजनकत्वेऽपीत्यादि ॥ तथा च
तत्रेष्टसाधनत्वाभावान्वयबोधस्वीकारे ग्रहणविधिविरोधो दुरुपपन्न इति भावः ॥
ननु ग्रहणाग्रहणयोस्तुल्यफलजनकत्वेन कथं बोधदुःखसाध्ये षोडशिग्रहणे प्रवृत्तिरि
त्यत आह । ग्रहणविध्यन्यथानुपपत्त्या चेति ॥ अतिशयनीयं बहुकालीनं ॥ तथा चते

॥२५॥

यो स्तु न्यफलजनकत्वेपि तुल्यकालीनफलाजनकत्वात् नोक्ताशंकाया अवकाश इति भावः ॥ ननु
नञो अभावार्थकत्वे कथं भूतलं न घट इत्यादौ भूतले धिकरणतासंबंधेन घटादेरत्यन्ताभाव
स्यान्योन्याभावे च न प्रतियोगितासंबंधेन घटादेरन्वयनाम । थं यो स्वे देनान्वयबोधांगीकारा
दित्यत आह ॥ प्रयोगिति यभावयोरित्यादि ॥ प्रतियोग्यनुयोगिभावः प्रतियोगित्वं ॥ आधाराधे
यभावः आधारत्वं आधेयत्वं उभयत्र उभयो । त्वेत्र नं तुल्यवृत्तिवेद्यत्वात् क्ति प्रायेण ॥ निपा
तेति ॥ अव्ययनिपातातिरिक्तेत्यर्थः ॥ तथा च फलबलान्निर्णीतो व्युत्पत्तिः प्रसादबोधं प्रति
प्रकारीभूत विशेष्यतयोपस्थिते न हेतुत्वं ॥ इति भावः ॥ अत एवेति ॥ अत एव एव निपातजन्य
स्याद्बोधे विशेष्यतयोपस्थिते एव हेतुत्वं अत एवेत्यर्थः ॥ इवाद्यन्वयबोधे चंद्र इव मुखमित्या
दाविवाद्यन्वयबोध पाते परिग्रहः ॥ ननु नञो अभावार्थकत्वे न घटं भूतलमित्यादौ
कथं नानाधर्मावच्छिन्न एकधर्मिबोधकत्वरूपसामान्यैनाधिकरण्योपपत्तिरित्यत आह ॥ आधे
भूतलमित्यादि ॥ संसर्गाभावान्यान्याभावार्थकनञ्भेदेनोदाहरणद्वयं ॥ अघटमित्यत्र

॥२५॥

अघटमित्यत्र नपुंसकलिंगनिर्देशस्तु न विद्यते॥ घटोऽपत्रेति बहुव्रीहिसमासस्य स्वीकरणा
पत्ते अन्यथा घट इत्युक्ते न घटोऽघट इति नञ्तत्पुरुषेऽपि तथाप्रयोगसंभवे तत्र च नञो
अन्योन्याभाववद्भेदार्थकतया संसर्गाभावलक्षणि क उदाहरणं संभवति इत्यपेः॥ आभा
ववस्यन्ते इति॥ अभाववद्बोधकता॥ यत्तु बहुव्रीहिसमासे सर्वत्र उत्तरपदे लक्षणा॥ अत
एव। ये चित्रगुरित्यादौ गवादिपद एव तथा प्रतिपादितं। एवं चाघटं तु तल्लभित्यादौ अपि घ
टपदस्यैव घटाभाववतीलक्षणा॥ वस्तुतस्तु चितात् तत्र कथं नञो अभाववति लक्षणा त्रिः संग
छत इति॥ तदसत्। चित्रगुरित्यादौ चित्रपदस्य लक्षणांगीकारस्याश्रयाभिन्नगोस्वामित्वास
त्वस्य ङ्कपरंपरारूपसंबंधात्मकलक्षणाकल्पने गौरवमिति लाघवात्तत्र गोपदस्य लक्षणाकल्पनात्॥
लाघवं च स्वस्वामित्वसंसर्गस्य साक्षात्संबंधरूपलक्षणांगीकारेण प्ररूते च घटपदस्य घटाभाव
वतिलक्षणानंगीकारे न तथा लाघवसंभवः॥ अपि तु तथा परंपरासंबंधरूपलक्षणाकल्पने गौ
रवमिति लाघवान्नञ एव तत्र संबंधिरूपलक्षणास्य संबंधात्मकलक्षणाकल्पनमुचितमिति।
यत्तु॥ निपातजन्यशाब्दबुद्ध्यं प्रत्यपि प्रकारीभूत। विशेष्यत्वार्थोपस्थितेर्हेतुत्वमुपेयते॥ तन्मतमाह॥

॥२६॥

क्वचिदिति ॥ प्रतियोगिपदोत्तरस्सुप इति ॥ अत्र तत्त्वं नघट इत्यादौ घटादिबोधक पदोत्तरस्सुप इत्यर्थः ॥
ननु सर्वत्र प्रतियोगित्वस्य नञसमभिव्याहृत प्रतियोगिबोधक पदोत्तर सुबर्थत्वे भावो न घटस्य
इति प्रयोगापत्तिः ॥ तत्रापि घटनिष्ठप्रतियोगित्वस्य स्वरूपसंबंधेनाभावस्य घटाभावे विद्यमान
त्वात् । न च घटस्येत्यत्र निरूपकत्वसंबंधावच्छिन्न घटप्रतियोगितानिष्ठप्रतियोगिताकाभावबोधा
भ्युपगमान्न तथा प्रयोगः घटनिष्ठप्रतियोगितायां निरूपकतासंबंधेन घटाभावे विद्यमानत्वा
दिति वाच्यं । वृत्त्यनियामकसंबंधस्याभावप्रतियोगितावच्छेदकतानंगीकारेण तथोक्तेरसंभवस्य
त्वात् । उच्यत आह ॥ अनुयोगित्वे वेति । वाकारो व्यवस्थितविकल्पसंपादकः ॥ तथा च क्वचित्प्र
तियोगित्वं तथाविधसुबर्थः ॥ क्वचिदनुयोगित्वं च लब्धं ॥ अत एव पटो न घटाभावस्येत्यादौ प
टे घटाभाव प्रतियोगित्वाभावबोधस्यानुभवोपि सत्पपद इति ध्येयं ॥ नञ्तरस्सुपो अधिकरणत्वा
र्थकत्वे सर्वत्र नञोत्तरसुपोनुसंधानकल्पनं तस्य तत्र लक्षणाकल्पनं चेत्युभयकल्पने गौर
वं तदपेक्षया नञ एवाभाववति लक्षणाकल्पनमुचितमित्याशयेनाह ॥ नञो वेति । ननु नञो
न्योन्याभावबोधे विशेषणवाचकपदविशेष्यवाचकपदयोः विरुद्धविभक्तिराहित्यं

॥२६॥

तत्र।मिति पूर्वमुक्तं तत्र विरुद्धविभक्तिकत्वं विरुद्धार्थप्रतिपादकविभक्तिकत्वं। अन्यथा घ
यन्त्रशासनस्थाने कर्मत्वादर्थस्यान्योन्याभावस्य एकवत्वाद्यर्थकप्रथमान्तपदार्थस्या
न्योन्याभावस्य कर्तृत्वाद्यर्थकप्रथमान्तपदार्थेऽन्वयबोधापत्तेः॥ तथा च प्रतियोगि
वाचकपदोत्तरसुपः प्रतियोगित्वाद्यर्थकत्वे सति तत्त्वेन घटत्वादौ नञोऽन्योन्याभा
वबोधकत्वासंभवः॥ विशेष्यवाचकपदोत्तरपदत्वप्रतिपादकविभक्तिः विशेषणवा
चकपदोत्तरविभक्त्यर्थप्रतियोगित्वादिविरुद्धार्थकत्वात्॥ एवं नञर्थसंसर्गाभाव
स्य भेदेन तु रूपदार्थान्वयानुभवे अनुयोगिवाचकपदोत्तरसप्तम्यर्थपक्षेति यत्पूर्वो
क्तं तदपि नञोत्तरसुपोऽधिकरणत्वे लक्षणयैव संभवात्॥ नञोऽभावत्वलक्ष
णकत्वे तत्कल्पनं तथाविधान्वयबोधाप्रसिद्धेः तथाविधान्वयबोधेतु तादृशसप्त

[OrderDescription]
,CREATED=16.10.20 12:43
,TRANSFERRED=2020/10/16 at 12:49:41
,PAGES=54
,TYPE=STD
,NAME=S0004045
,Book Name=M-889-NAVAVIVICHEN
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF

FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF

FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF

FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF

FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,